“माध्वी सिता मधूत्पन्ना मधुजा मधुशर्करा ।
माक्षीकशर्करा चैषा क्षौद्रजा क्षौद्रशर्करा ॥
यद्गुणं यन्मधु प्रोक्तं तद्गुणा तस्य शर्करा ।
विशेषाद्दाहतृष्णा च तर्पणं क्षीणदेहिनाम् ॥”
इति राजनिर्घण्टः ॥

(“मधुशर्करा पुनश्छर्द्द्यतीसारहरी रूक्षाच्छेदनी प्रह्लादनी कषायमधुरा मधुरविपाका च ।”
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

मधुशाखः, पुं, (मधुर्माधुर्य्ययुक्ता शाखा यस्य ।) मधुष्ठीलः । इति शब्दचन्द्रिका ॥ (मधुरशाखाविशिष्टे, त्रि । यथा, वाजसनेयसंहितायाम् । २८ । २० । “मधुशाखः सुपिप्पलः ।”
“मधुरा रसवती शाखा यस्य ।”
इति तद्भाष्ये महीधरः ॥)

मधुशिग्रुः पुं, (मधुप्रधानः शिग्रुः ।) रक्तशोभाञ्जनवृक्षः । इत्यमरः । २ । ४ । ३१ ॥ (शजिना । इति ख्यातः । यथा, सुश्रुते ।१।३७।
“वरुणार्त्तगलशिग्रुमधुशिग्रुतर्कारीत्यादि ।”
तत्पर्य्यायो यथा,—
“सुरङ्गा स्वादुगन्धा स्यान्मधुशिग्रुः शोभाञ्जनः ॥”
इति वैद्यकरत्नमालायाम् ॥
तद्गुणा यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
“मधुशिग्रुः सरस्तिक्तः शोफघ्नो दीपनः कटुः ।”)

मधुशेषं, क्ली, (मधुनः शेषो यत्र ।) शिक्थकम् । इति राजनिर्घण्टः ॥

मधुश्रेणी, स्त्री, (मधूनां मधुररसानां श्रेणिर्यत्र ।) मूर्व्वा । इत्यमरः ।२।४।८४ ॥ (अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
“मूर्व्वा मधुरसा देवी मोरटा तेजनी स्रुवा ।
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥”)

मधुश्वासा, स्त्री, (मधुर्मधुरः श्वासोऽस्याः ।) जीवन्तीवृक्षः । इति राजनिर्घण्टः ॥ (विवरणमस्या जीवन्तीशब्दे ज्ञातव्यम् ॥)

मधुष्ठीलः, पुं, (मधु मकरन्दं ष्ठीवति निःक्षिपतीति । ष्ठीव् + इगुपधत्वात् कः । पृषोदरादित्वाद्वस्य लत्वम् ।) मधूकवृक्षः । इत्यमरः । २ । ४ । २८ ॥ (अस्य पर्य्यायो यथा,—
“मधूको गुडपुष्पः स्यान्मधुपुष्पो मधुद्रुमः ।
वानप्रस्थो मधुष्ठीलो जलजेऽत्र मधूलकः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मधुसखः, पुं, (मधोर्वसन्तस्य सखा इति ।“राजाहःसखिभ्यष्टच् ।” ५ । ४ । ९१ । इति टच् ।) कामदेवः । इति हलायुधः ॥

मधुसारथिः, पुं, (मधुर्वसन्तः सारथिर्यस्य ।) कामदेवः । इति त्रिकाण्डशेषः ॥

मधुसिक्थकः, पुं, (सिच्यतीति सिक्थः स्थक् । स्वार्थे कन् मधु मधुमयं सिक्थकं यस्य ।) स्थावरविषभेदः । इति हेमचन्द्रः । ४ । २६४ ॥

मधुसुहृत्, [द्] पुं, (मधोर्वसन्तस्य सुहृत् ।) कामदेवः । इति केचित् ॥

मधुसूदनः, पुं, (मधु पुष्परसं सूदयति भक्षयतीति । सूद् + णिच् + ल्युः ।) भ्रमरः । इति जटाधरः ॥ (मधुं तन्नामानं असुरं सूदयति नाशयतीति । सूद् + णिच् + ल्युः ।) श्रीकृष्णः । इत्यमरटीकायां भरतः ॥ (पद्यद्वये एकः श्लिष्टश्लोको यथा, छन्दोमञ्जर्य्याम् । ११ । ३ ।
“वनेषु कृत्वा सुरभिप्रचारं
प्रकामसुग्धो मधुवासरेषु ।
गायन् कलं क्रीडति पद्मिनीषु
मधूनि पीत्वा मधुसूदनोऽसौ ॥”)
श्रीकृष्णपक्षे व्युत्पत्तिर्यथा,—
“सूदनं मधुदैत्यस्य यस्मात् स मधुसूदनः ।
इति सन्तो वदन्तीशं वेदैर्भिन्नार्थमीप्सितम् ॥
मधु क्लीवञ्च माध्वीके कृतकर्म्मशुभाशुभे ।
भक्तानां कर्म्मणाञ्चैव सूदनं मधुसूदनः ॥
परिणामाशुभं कर्म्म भ्रान्तानां मधुरं मधु ।
करोति सूदनं यो हि स एव मधुसूदनः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः ॥
तस्य स्मरणफलम् ।
“महाविपत्तौ संसारे यः स्मरेन्मधुसूदनम् ।
विपत्तौ तस्य सम्पत्तिर्भवेदित्याह शङ्करः ॥”
तत्रैव प्रकृतिखण्डे ३४ अध्यायः ॥
(सरस्वत्युपनामकः कविविशेषः । यथा, श्रीमद्भगवद्गीताटीकायाम् । “व्याख्यातं भगवत्पदैः प्रतिपदं श्रीशङ्कराख्यैः पुनर्व्विस्पष्टं मधुसूदनेन मुनिना स्वज्ञानसिद्ध्यै कृतम् ॥” अयं हि अद्वैतसिद्धिप्रस्थानभेदभगवद्गीताटीकामहिम्नस्तवटीकासिद्धान्तबिन्दुटीकाद्यनेकग्रन्थकर्त्ता ॥)

मधुसूदनी, स्त्री, (मधु सूदयतीति । मधु + सूद् + णिच् + ल्युः । स्त्रियां ङीप् ।) पालङ्क्यशाकम् । इति हेमचन्द्रः । ४ । २५२ ॥

मधुस्रवः, पुं, (मधूनां मकरन्दानां स्रवः क्षरणं यस्मादिति ।) मधूकवृक्षः । मोरटलता । इति राजनिर्घण्टः ॥

मधुस्रवा, स्त्री, (मधुनः स्रवो यस्याः ।) मधुयष्टिका । इति जटाधरः ॥ जीवन्ती । इति शब्दचन्द्रिका ॥ (अस्याः पर्य्यायो यथा,—
“जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मूर्व्वा । हंसपदी । इति राजनिर्घण्टः ॥

मधुस्रवाः, [स्] पुं, (मधूनि स्रवति निःक्षिपतीति । स्रु + कर्त्तरि असुन् ।) मधूकवृक्षः । इति जटाधरः ॥

मधुस्वरः, पुं, (मधुर्मनोहरः स्वरो ध्वनिर्यस्य ।) कोकिलः । इति शब्दरत्नावली ॥

मधुहा, [न्] पुं, (मधुं तन्नामानमसुरं हन्तीति । हन् + क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥ (मधु हन्तीति । हन् + क्विप् । मधुनाशके, त्रि । यथा, महाभारते । ३ । ३३ । ६८ ।
“सर्व्वथा संहतैरेव दुर्व्वलैर्बलवानपि ।
अमित्रः शक्यते हन्तुं मधुहा भ्रमरैरिव ॥”
प्रसहजातिप्राणिविशेषः ॥ यथा,—
“शशघ्नी भासकुररगृध्रोलूककुलिङ्गकाः ।
धूमिका मधुहा चेति प्रसहा मृगपक्षिणः ॥”
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥)

मधूकं, क्ली, (मह्यतीति । मह् + “उलूकादयश्च ।” उणा० ४ । ४१ । इति ऊकः निपातितश्च ।) यष्टिमधु । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य यष्टिमधुशब्दे विज्ञेयाः ॥)

मधूकः, पुं, (मह्यते मन्यते वेति । मह् + मन् वा + “उलूकादयश्च ।” उणा० ४ । ४१ । इति ऊकप्रत्ययो निपातितश्च ।) वृक्षविशेषः । महुल इति मौल इति महुया इति च भाषा ॥ तत्पर्य्यायः । गुडपुष्पः २ मधुद्रुमः ३ वानप्रस्थः ४ मधुष्ठीलः ५ । इत्यमरः । २ । ४ । २८ ॥ मधुकः ६ मधुः ७ मधुपुष्पः ८ । इति शब्दरत्नावली ॥ मधुस्रवः ९ । इति जटाधरः ॥ मधुवृक्षः १० रोधपुष्पः ११ माधवः १२ । (यथा, महाभारते । १५ । २५ । ११ ।
“चित्राङ्गदा चैव नरेन्द्रकन्या
येषा सवर्णाग्र्यमधूकपुष्पैः ॥”)
अस्य गुणाः । मधुरत्वम् । शीतत्वम् । पित्तदाहश्रमापहत्वम् । वातलत्वम् । जन्तुदोषघ्नत्वम् । वीर्य्यपुष्टिविवर्द्धनत्वञ्च । अस्य पुष्पगुणाः । मधुरत्वम् । हृद्यत्वम् । हिमत्वम् । पित्तविदाहकारित्वञ्च । अस्य फलगुणाः । वातामयपित्तनाशित्वम् । ज्ञेयं मधूकद्वयमेवमेतत् । इति राजनिर्घण्टः ॥ अपि च ।
“मधूकपुष्पं मधुरं शीतलं गुरु बृंहणम् ।
बलशुक्रकरं प्रोक्तं वातपित्तविनाशनम् ॥
फलं शीतं गुरु स्वादु शुक्रलं वातपित्तनुत् ।
अहृद्यं हन्ति तृष्णास्रदाहश्वासक्षत-
क्षयान् ॥”
इति भावप्रकाशः ॥
अपरञ्च ।
“मधूकपुष्पञ्चाहृद्यं तर्पणं बृंहणं परम् ।
मधूकस्य फलं पक्वं वातपित्तप्रणाशनम् ॥”
तन्मज्जगुणास्तत्फलगुणवत् । यथा,—
“यस्य यस्य फलस्यैव वीर्य्यं भवति यादृशम् ।
तस्य तस्यैव वीर्य्येण मज्जानमभिनिर्द्दिशेत् ॥”
तस्य त्वग्गुणाः ।
“मधूकं रक्तपित्तघ्नं व्रणशोधनरोपणम् ॥”
इति राजवल्लभः ॥

मधूच्छिष्टं, क्ली, (मधुनः उच्छिष्टमवशिष्टम् । मध्ववशिष्टम् । मोम इति भाषा ॥ (यथा, बृहत्संहितायाम् । १६ । २५ ।
“शैलेयकमांसीतगरकुष्ठरससैन्धवादिवल्लीजम् ।
मधुररसमधूच्छिष्टानि चोरकश्चेति जीवस्य ॥”)
तत्पर्य्यायः । सिक्थकम् २ । इत्यमरः । २ । ९ । १०७ ॥ शिक्थकम् ३ शिक्थम् ४ । इति शब्दरत्नावली ॥

मधूत्थितं, क्ली, (मधुनः उत्थितम् ।) सिक्थकम् । इति राजनिर्घण्टः ॥